तर्कः, पुं, (तर्क+भावे घञ् ।) आकाङ्क्षा । वितर्कः । व्यभिचारशङ्कानिवर्त्तकः । इति भाषापरिच्छेदः ॥ (यथा, महाभारते । ३ । १६६ । १०८ ।
"शुष्कतर्कं परित्यज्य आश्रयस्व श्रुतिं स्मृतिम् ॥")
स च पञ्चविधः । यथा । आत्माश्रयः १ अन्योन्याश्रयः २ चक्रकः ३ अनवस्था ४ प्रमाणबाधितार्थकः ५ । इति जगदीशः ॥ एषां लक्षणानि तत्तच्छब्दे द्रष्टव्यानि ॥ ऊहः । हेतुशास्त्रम् । तत्तु मीमांसादि । इति मेदिनी । के, २५ । (यथा, मनुः । १२ । १०६ ।
"आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्म्मं वेद नेतरः ॥"
न्यायशास्त्रम् । यथा, नैषधे ।
"यत्काव्यं मधुवर्षिधर्षितपरास्तर्केषु यस्योक्तयः ॥"
ज्ञानम् । यथा, महाभारते । १ । १६८ । १८ ।
"तं वै फलार्थिनं मन्ये भ्रातरं तर्कचक्षुषा ॥"
अर्थवाद इति कर्कोपाध्यायः । यथा, अक्ताः शर्करा उपदधातीति विधिः श्रूयते । तत्राञ्जनसाधनं घृतं तैलं वा तन्मध्ये केनाक्ता इति संशये तेजो वै घृतमित्यर्थवादात् घृतेनाक्ता इति निर्णीयते । अतस्तर्कोऽर्थवादः ॥")
तर्ककः, पुं, (तर्केण आकाङ्क्षया कायति प्रकाशते इति । कै+कः ।) याचकः । इति हेमचन्द्रः ॥ (यथा, महाभारते । १२ । ४५ । ६ ।
"तथानुजीविनो भृत्यान् संश्रितानतिथीनपि ।
कामैः सन्तर्पयामास कृपणांस्तर्ककानपि ॥"
तर्कयतीति । तर्क+ण्वुल् ।) तर्ककारकश्च ॥
तर्कविद्या, स्त्री, (तर्कोपदेष्ट्री विद्या तर्करूपा या विद्या वा ।) न्यायविद्या । तत्पर्य्यायः । आन्वीक्षिकी २ । इत्यमरः । १।६।५ ॥ (यथा, महाभारते । १३ । ३७ । १२ ।
"आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थिकाम् ॥)
तर्कारी, स्त्री, (तर्कं ऋच्छतीति । ऋ+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । ङीप् च ।) जयन्तीवृक्षः । इत्यमरः । ४ । २ । ६५ ॥
(पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम् ।
"वैजयन्ती च तर्कारी जयन्ती विजया जया ॥"
अस्या गुणा यथा,—
"तर्कारी वरुणं स्वादु सतिक्तं कफवातजित् ॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥
अस्याः व्यवहारो यथा,—
"तर्कारी विम्वशिग्रुसुरसवत्सकनिम्बजैः ।
पत्रमूलफलैस्तोयं शृतसुष्णञ्च सेचनम् ॥"
इति चरके चिकित्सास्थाने सप्तविंशेऽध्याये ॥
इयं गणिकारिकापि वाच्या । तत्पर्य्याया यथा,
"अग्निमन्थो जयः स स्याच्छ्रीपर्णी गणिकारिका ।
जया जयन्ती तर्कारी नादेयी वैजयन्तिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तर्किणः, पुं, चक्रमर्द्दवृक्षः । इतिरत्नमाला ॥ तर्किलोऽपि पाठः ॥ (चक्रमर्द्दशब्देऽस्य विवृतिर्व्याख्याता ॥)

तर्की, [न्] त्रि, (तर्कयितुं शीलमस्य यद्वा तर्कयतीति । तर्क+णिनिः ।) तर्कविशिष्टः । मीमांसकः । यथा,—
"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः ।
त्रयश्चाश्रमिणः पूर्व्वे परिषत् स्याद्दशावरा ॥"
इति मनुः । १२ । १११ ॥
तर्कुः, स्त्री, (कृत्+उः । निपातनात् साधुः ।) सूत्रनिर्म्माणयन्त्रम् । टेको इति भाषा ॥ तत्पर्य्यायः । कपालनालिका २ । इति त्रिकाण्डशेषः ॥ तर्कुटी ३ सूत्रला ४ । इति हारावली ॥ (कुम्भकारस्य चक्राकारशिलाभाण्डम् । यथा, अनर्घराघवे । २ । ६ ।
"शङ्के सम्प्रति यावदभ्युदयते तत्तर्कुटङ्कोन्मृजारञ्यद्भिम्बरजश्छटावलयितो देवस्त्विषामीश्वरः ॥")
तर्कुटं, क्ली, (तर्कयति सूत्रोत्पादकतया शोभते इति । तर्क दीप्तौ+बाहुलकात् उटन् ।) कर्त्तनम् । इति त्रिकाण्डशेषः ॥ काटनाकाटा इति भाषा ॥
तर्कुटी, स्त्री, (तर्कुट+स्त्रियां गौरादित्वात् ङीष् ।) तर्कुः । इति हारावली । २१३ ।
तर्कुपिण्डः, पुं, (तर्कुस्थितः पिण्डः । मध्यपदलोपिसमासः ।) तर्कुस्थितमृत्पिण्डः । टेकोर वाँटुल इति भाषा ॥ तत्पर्य्यायः । वर्त्तिनी २ । इति जटाधरः ॥ तर्कुपीठी ३ वर्त्तुला ४ । इति हारावली । २१३ ॥
तर्कुपीठी, स्त्री, (तर्कुस्थिता पीठी खल्वी मृत्पिण्डः ।) तर्कुपिण्डः । इति हारावली । २१३ ॥
तर्कुलासकः, पुं, (लासयति शोभयतीति । लस कान्तौ+णिच्+ण्वुल् । तर्कुः सूत्रनिर्म्माणयन्त्रं तस्या लासकः ।) भाल्लोलः । इति हारावली । २१३ ॥ खरसा इति भाषा ॥
तर्कुशाणः, पुं, (तर्कोः शाणः ।) सामकः । इति त्रिकाण्डशेषः ॥ टेकोर शाण इति भाषा ॥
तर्क्षुः, पुं, (तरक्षुः पृषोदरादित्वात् साधुः ।) तरक्षुः । इति शब्दरत्नावली ॥
तर्क्ष्यः, पुं, यवक्षारः । इति रत्नमाला ॥
तर्ज्ज, भर्त्सने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) तर्ज्जति । इति दुर्गादासः ॥
तर्ज्ज, क ङ भर्त्से । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं सकं-सेट् ।) क ङ, तर्ज्जयते । भर्त्सस्तर्ज्जनम् । तामतर्ज्जयदम्बरे । इति रघुप्रयोगस्तु तर्ज्जनं तर्ज्जः । तर्ज्जं करोतीति णौ साध्यः । इति दुर्गादासः ॥
तर्ज्जनं, क्ली, (तर्ज्ज+भावे ल्युट् ।) भर्त्सनम् । यथा । अधीरायास्तर्ज्जनताड़नादि । इति रसमञ्जरी ॥ (यथाच कुमारे । ६ । ४५ ।
"भ्रूभेदिभिः सकम्पोष्ठैर्ललिताङ्गुलितर्ज्जनैः ।
यत्र कोपैः कृताः स्त्रीणामाप्रसादार्थिनः
प्रियाः ॥")
तर्ज्जनी, स्त्री, (तर्ज्यतेऽनयेति । तर्ज्ज भर्त्सने+करणे ल्युट् । ततः स्त्रियां ङीप् ।) अङ्गुष्ठसमीपाङ्गुलिः । तत्पर्य्यायः । प्रदेशिनी २ । इत्यमरः । २ । ६ । ८१ ॥ सा तु गर्भस्थस्य चतुर्भिर्म्मासैर्भवति । इति सुखबोधः ॥ (यथा, कथासरित्सागरे । १७ । ८८ ।
"तच्छ्रुत्वा श्वशुरं तं सा वधूः सोमप्रभा क्रुधा ।
विलोक्य भ्रामयामास यमाज्ञामिव तर्ज्जनीम् ॥")
तर्ज्जिकः, पुं, (तर्ज्जस्तर्ज्जनमस्त्यत्र । तर्ज्ज+ठन् ।) देशविशेषः । तत्पर्य्यायः । तायिकः २ । इति हेमचन्द्रः । ४ । २४ ॥
तर्णः, पुं, (तर्णोति तृणादिकं भक्षयतीति । तृण् भक्षणे+अच् ।) वत्सः । इति हेमचन्द्रः । ४ । ३२६ ॥
तर्णकः, पुं, (तर्ण एव । स्वार्थे कन् ।) सद्योजातवत्सः । इत्यमरः । २ । ९ । ६१ ॥ कोमले वाछुर इति भाषा ॥ (यथा, राजतरङ्गिण्याम् । ५ । ४३६ ।
"स्नानचीरां वरां पत्नीं रुद्धद्वारां निपात्यते ।
आलिङ्ग्यमानां क्रन्दद्भिस्तर्णकैरिव दारकैः ॥"
बालकः । यथा, अनर्घराघवे । २ । २३ ।
"मुनिविनियोगलूनप्ररूढ़स्फुटशाड्वलानि
बर्हींषि ।
गोकर्णतर्णकोऽयं तर्णोत्युपकण्ठकच्छेषु ॥")
तर्णिः, पुं, (तरणिः पृषोदरादित्वादलोपः ।) सूर्य्यः । प्लवः । इति शब्दार्थकल्पतरुः ॥
तर्त्तरीकं, क्ली, (तीर्य्यतेऽनेनेति । तॄ+"फर्फरीकादयश्च ।" उणां । ४ । २० । इति ईकप्रत्ययेन निपातनात् साधुः ।) नौका । (तरतीति । कर्त्तरि ईकः ।) पारगे, त्रि । इति मेदिनी । के, १६१ ॥
तर्द, हिंसे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) तर्द्दति । इति दुर्गादासः ॥
तर्दूः, स्त्री, (तरति प्लवते इति । तॄ+"त्रो दुक् च ।" उणां । १ । ९१ । इति ऊः दुगागमश्च ।) दारुहस्तकः । इत्यमरः । २ । ९ । ३४ । काठेर हाता इति भाषा ॥
तर्पणं, क्ली, (तृप प्रीणने+भावे ल्युट् ।) तृप्तिः । प्रीणनम् । इत्यमरः । २ । ९ । ५६ ॥ (यथा, कथासरित्सागरे । २६ । २३६ ।
"तत्राहूय तरोर्मूले वेतालं नृकलेवरे ।
पूजयित्वाकरोत्तस्य नृमांसबलितर्पणम् ॥")
यज्ञकाष्ठम् । इति हेमचन्द्रः ॥ (तृप्यन्ति पितरो येन । तृप्+करणे ल्युट् ।) देवर्षिपितृमनुष्याणां जलाञ्जलिदानेन तृप्तिसम्पादनम् । यथा,
"एवं स्नात्वा पितॄन् देवान् मनुष्यांस्तर्पयेन्नरः ।
नाभिमात्रे जले स्थित्वा चिन्तयेदूर्द्ध्वमानसः ॥
आगच्छन्तु मे पितर इमं गृह्णन्त्वपोऽञ्जलिम् ।
त्रींस्त्रीञ्जलाञ्जलीन्दद्यादाकाशे दक्षिणे तथा ॥
वसित्वा वसनं शुक्लं स्थले चास्तीर्णबर्हिषि ।
विधिज्ञास्तर्पणं कुर्य्युर्न पात्रे तु कदाचन ॥
यदपां क्रूरमांसन्तु यदमेध्यन्तु किञ्चन ।
अशान्तं मलिनं यच्च तत् सर्व्वमपगच्छतु ॥
गृहीत्वानेन मन्त्रेण तोयं सव्येन पाणिना ।
प्रक्षिपेद्दिशि नैरृत्यां रक्षोपहतयेऽद्भुतम् ॥
अनाक्षिकन्तु यद्दुष्टं पापादृयच्च प्रतिग्रहम् ।